१५

॥विश्वामित्र-नदीकथा॥

प्रस्तावना

कस्यापि भवनस्य भित्तिः यथा तथा भारतीयसंस्कृतेः भित्तिः वेदाः। अत एव संस्कृतसाहित्ये वेदानां स्थानं सर्वान् अतिशेते। भारते धर्मव्यवस्था वेदायत्ता एव। वेदो धर्मनिरूपणे स्वतन्त्रभावेन प्रमाणम्, स्मृत्यादयः तु वेदमूलकतया वर्तते। अत एव श्रुतिस्मृत्योः विरोधे श्रुतिरेव गरीयसी। न केवलं धर्ममूलकतयैव वेदाः समादृताः, अपि तु विश्वस्मिन् सर्वप्राचीनग्रन्थतया अपि। प्राचीनानि धर्मसमाज-व्यवहार-प्रभृतीनि वस्तुजातानि बोधयितुं श्रुतय एव क्षमन्ते। विद्यन्ते धर्मादयः पुरुषार्थाः यैः ते वेदाः इति। सायणस्तु अपौरुषेयं वाक्यं वेद इत्याह। इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकम् उपायं यो वेदयति स वेद इति। तत्र कारिका -

"प्रत्यक्षेणानुमित्या वा यस्तूपायो न विद्यते।

एनं विदन्ति वेदेन तस्माद् वेदस्य वेदता॥" इति।

वेदाः चत्वारः भवन्ति। तथा हि - ऋग्वेदः, सामवेदः, यजुर्वेदः, अथर्ववेदश्चेति। तत्र ऋग्वेदे नैके रसपूर्णसंवादासूक्ताः सन्ति। वैदिककथासहित्ये विश्वामित्र-नदीकथा एका अन्यतमा कथा। एवम् ऋग्वेदे अनेके सूक्ते कथोपकथनं प्राधान्येन दृश्यते। अतः कथोपकथनं संवादनाम्ना प्रसिद्धः। कथोपकथनमध्ये विश्वामित्र-नदीकथा अतीव मनोरमा। अत्र शुतुद्रु-विपाशयोः नद्योः कथा वर्तते। किं च तयोः सृष्टेः कारणं किम्। कः तयोः सृष्टिकर्ता। विश्वमित्रेण नद्याः का वार्ता अभवत् इत्यादि अत्र पाठे प्रस्तूयते।

उद्देश्यानि

इमं पाठं पठित्वा भवान् -

- वैदिकसाहित्येतिहासं ज्ञास्यति।
- मुनि-ऋषीणां चारित्रिकं ज्ञास्यति।
- वैदिकयुगे याः नद्यः आसन् ताः ज्ञास्यति।
- कथं नद्यः सृष्टाः तत्र किं कारणमिति तदपि ज्ञास्यति।
- मन्त्रस्य संहितापाठं ज्ञास्यति।
- मन्त्रस्य पदपाठं ज्ञास्यति।

- स्वयमेव मन्त्राणां व्याख्यानं कर्तुं शक्यो भवेत्।
- स्वयमेव मन्त्राणाम् अन्वयं कर्तुं समर्थो भवेत्।
- मन्त्रे स्थितं व्याकरणं ज्ञास्यति।

१५.१) अथ मूलपाठः

प्र पर्वतानामुशती उपस्थादश्वेइव विषिते हासमाने।
गावेव शुभ्रे मातरा रिहाणे विपाट्छुतुद्री पयसा जवेते॥१॥

इन्द्रेषिते प्रसवं भिक्षमाणे अच्छा समुद्रं रथ्येव याथः।
समाराणे ऊर्मिभिः पिन्वमाने अन्या वामन्यामप्येति शुभ्रे॥२॥

अच्छा सिन्धुं मातृतमामयासं विपाशमुर्वीं सुभगामगन्म।
वत्समिव मातरा संरिहाणे समानं योनिमनु संचरन्ती॥३॥

एना वयं पयसा पिन्वमाना अनु योनिं देवकृतं चरन्तीः।
न वर्तवे प्रसवः सर्गतक्तः किंयुर्विप्रो नद्यो जोहवीति॥४॥

रमध्वं मे वचसे सोम्याय ऋतावरीरुप मुहूर्तमेवैः।
प्र सिन्धुमच्छा बृहती मनीषावस्युरह्वे कुशिकस्य सूनुः॥५॥

इन्द्रो अस्माँ अरदद्वज्रबाहुरपाहन्वृत्रं परिधिं नदीनाम्।
देवोऽनयत्सविता सुपाणिस्तस्य वयं प्रसवे याम उर्वीः॥६॥

प्रवाच्यं शश्वधा वीर्यं१ तदिन्द्रस्य कर्म यदहिं विवृश्चत्।
वि वज्रेण परिषदो जघानायन्नापोऽयनमिच्छमानाः॥७॥

एतद्वचो जरितर्मापि मृष्ठा आ यत्ते घोषानुत्तरा युगानि।
उक्थेषु कारो प्रति नो जुषस्व मा नो नि कः पुरुषत्रा नमस्ते॥८॥

ओ षु स्वसारः कारवे शृणोत ययौ वो दूरादनसा रथेन।
नि षू नमध्वं भवता सुपारा अधोअक्षाः सिन्धवः स्रोत्याभिः॥९॥

आ ते कारा शृणवामा वचांसि ययाथ दूरादनसा रथेन।
नि ते नंसै पीप्यानेव योषा मर्यायेव कन्या शश्वचै ते॥१०॥

यदङ्ग त्वा भरता संतरेयुर्गव्यन्ग्राम इषित इन्द्रजूतः।
अर्षादह प्रसवः सर्गतक्त आ वो वृणे सुमतिं यज्ञियानाम्॥११॥

अतारिषुर्भरता गव्यवः समभक्त विप्रः सुमतिं नदीनाम्।
प्र पिन्वमाध्वमिषयन्तीः सुराधा आ वक्षणाः पृणध्वं यात शीभम्॥१२॥

उद्व ऊर्मिः शम्या हन्त्वापो योक्त्राणि मुञ्चत।
मादुष्कृतौ व्येनसाघ्न्यौ शूनमारताम्॥१३॥

१५.१.१) अथ मूलपाठाध्ययनम् -

प्र पर्वतानामुशती उपस्थादश्वेइव विषिते हासमाने।
गावेव शुभ्रे मातरा रिहाणे विपाट्छुतुद्री पयसा जवेते॥१॥

पदपाठः- प्र। पर्वतानाम्। उशती इति। उपस्थात्। अश्वे इवेत्यश्वेऽइव। विसिते इति विऽसिते। हासमाने इति॥ ग्रावाऽइव। शुभ्रे इति। मातरा। रिहाणे इति। विऽपाट् शुतुद्री। पयसा। जवेते इति॥१॥

अन्वयः- पर्वतानाम् उपस्थात् विपाट्शुतुद्री उशती, विषिते अश्वेइव, हासमाने शुभ्रे मातरा रिहाणे पयसा प्र जवेते।

व्याख्या - 'पर्वतानां' गिरिणां शैलानाम् 'उपस्थात्' उत्सङ्गान्निर्गत्य 'उशती' समुद्रगमनं कामयमाने। गमने दृष्टान्तः। 'अश्वेइव'। यथा 'विषिते' मन्दुरातो विमुक्ते 'हासमाने' अन्योन्यजवने स्पर्धमाने। यद्वा हृष्यन्त्यावश्वे इव वडवे इव त्वरया गच्छन्तौ परस्परं हृष्यन्तौ। तथा 'गावेव शुभ्रे'। यथा द्वौ गावौ शोभमानौ वर्तेते तद्वच्छुभ्रे शोभमाने। किंच 'मातरा'। यथा मातरौ धेनू। 'रिहाणे'। अन्तर्णीतसन्नर्थो लिहि। वत्सं जिह्वया लेढुमिच्छन्त्यौ शीघ्रं गच्छतस्तद्वत् समुद्रं गन्तु जवात् गच्छन्त्यौ 'पयसा' संयुक्ते 'विपाट्'। कूलविपाटनात् विपाशनाद्वा विमोचनाद्वा विमोचनाद्वा विपाट्। 'शुतुद्री'। शु क्षिप्र

तु तुन्न तुन्नेव द्रवति गच्छतीति शुतुद्री। एतन्नामके नद्यौ प्र 'जवेते' समुद्रं प्रति शीघ्रं गच्छतः। अत्र निरुक्तं 'पर्वतानामुपस्थानादुशत्यौ कामयमाने अश्वे इव विमुक्ते इति वा विषण्णे इति वा हासमाने हासतिः स्पर्धाया हर्षमाणे वा गावाविव शुभ्रे शोभने मातरौ संरिहाणे विपाट्छुतुद्र्यौ पयसा प्रजवेते' (निरु. ९.३९) इति॥

सरलार्थः -

(विश्वामित्रः नदीं प्रति कथयति यत्) पर्वतक्रोडात् निर्गच्छन्त्यौ (समुद्रमुद्दिश्य) गमनलिप्सया (परस्परं) स्पर्धिनीरूपेण धावन्त्यौ, उन्मुक्तप्रग्रहे अश्वे इव, (स्ववत्सं) लेहनकारिण्यौ मातारौ गावौ इव, विपाट्-शुतुद्र्यौ (स्वस्याः) महता वेगेन प्रवहतः।१

व्याकरणम् -

- शती-वश्-धातोः शतरि ङीपि। ग्रहिज्या इत्यादिसूत्रेण संप्रसारणेन उशती।
- उपस्थात्-उपस्थीयते अत्र। उपपूर्वकात् स्था-धातोः कप्रत्यये उपस्थ इति।ततः पञ्चम्येकवचने।
- विषिते-विपूर्वकात् षिञ्-धातोः क्तप्रत्यये विषित। ततः स्त्रीलिङ्गे प्रथमाद्विवचने।
- हासमाने-हस्-धातोः शनचि हसमान इति। ततः स्त्रीलिङ्गे प्रथमाद्ववचने।
- शुभ्रे- शुभ्-धातोः रप्रत्यये स्त्रीलिङ्गे प्रथमाद्विवचने।
- रिहाणे- लिह्धातोः शानचि लस्य छन्दसि रादेशे नस्य णादेशे ततः स्त्रीलिङ्गे प्रथमाद्विवचने।
- जवेते-जुङ्धातोः लटि प्रथमापुरुषद्विवचने।

इन्द्रेषिते प्रसवं भिक्षमाणे अच्छा समुद्रं रथ्येव याथः।
समाराणे ऊर्मिभिः पिन्वमाने अन्या वामन्यामप्येति शुभ्रे॥२॥

पदपाठः- इन्द्रेषिते इतीन्द्रऽइषइवे। प्रऽसवम्। भिक्षमाणे इति। अच्छ। समुद्रम्। रथ्याऽइव। याथः॥ समाराणे इति सम्ऽआराणे। ऊर्मिऽभिः। पिन्वमाने इति। अन्या। वाम्। अन्याम्। अपि। एति। शुभ्रे इति॥

अन्वयः- इन्द्रेषिते प्रसवं भिक्षमाने समुद्रम् अच्छा रथ्येव याथः। (हे) शुभ्रे! समारणे ऊर्मिभिः पिन्वमाने वाम् अन्या अन्याम् अति एति।

व्याख्या- हे नद्यौ 'इन्द्रेषिते' इन्द्रेण प्रेषिते 'प्रसवं' तस्येन्द्रस्यानुज्ञां 'भिक्षमाणे' प्रार्थयमाने युवां 'समुद्रम्' 'अच्छ' आभिमुख्येन 'याथः' गच्छथः। तत्र दृष्टान्तः। 'रथ्येव' इति। यथा रथिनौ लक्ष्यं देशमभिगच्छतस्तद्वत्। किं कुर्वत्यौ। 'समाराणे' परस्परं संगच्छन्त्यौ 'ऊर्मिभिः' तरङ्गैः 'पिन्वमाने' परिसरप्रदेशे संतर्पयन्त्यौ 'शुभ्रे' शौभमाने। युवां समुद्रं गच्छथ इति पूर्वेणान्वयः। तथा 'वां' युवयोर्मध्ये 'अन्या' एका 'अन्याम्' अपरां नदीम् 'अप्येति' अपिगच्छति। परस्परमैक्यमापद्यत इत्यर्थः॥

सरलार्थः -

इन्द्रेण प्रेषिते, प्रवाहं भिक्षयित्र्यौ, किञ्च द्वे सारथ्यौ इव समुद्रमुद्दिश्य (युवाम्) प्रधावतः। हे शुभ्रजले, (युवाम्) यौगपद्येन गच्छन्त्यौ, ऊर्मिभिः धावन्त्यौ परस्परं परस्परं प्रति गच्छतः। २

व्याकरणम् -

- इन्द्रेषिते- इन्द्रेण इषिते, इष्-धातोः क्तप्रत्यये इडागमे।
- भिक्षमाणे- भिक्ष-धातोः शानचि।
- प्रसवम्- प्रपूर्वकात् सू-धातोः अप्प्रत्यये प्रसव इति।
- रथ्या- रथ्यास्य इदम्।तस्येदम् इत्यर्थे रथाधत् इति सूत्रेण यत्प्रत्यये रथ्य इति।
- याथः-या-धातोः लटि मध्यमपुरुषद्विवचने।
- समाराणे-सम्पूर्वकात् आपूर्वकात् ऋ गतौ इतिधातोः कानचि गुणे।
- पिन्वमाने-पिविधातोः शानचि नमागमे मुकागमे।

अच्छा सिन्धुं मातृतमामयासं विपाशमुर्वीं सुभगामगन्म।
वत्समिव मातरा संरिहाणे समानं योनिमनु संचरन्ती॥३॥

पदपाठः- अच्छ। सिन्धुम्। मातृऽतमिम्। अयासम्। विऽपाशम्। उर्वीम्। सुऽभगाम्। अगन्म॥
वत्सम्ऽइव। मातरा। संरिहाणे इति सम्ऽरिहाणे। समानम्। योनिम्। अनु। संचरन्ती
इति सम्ऽचरन्ती॥३॥

अन्वयः- मातृतमां सिन्धुम् अच्छ अयासम्, उर्वीं सुभगां विपाशाम् अगन्म। मातरा वत्समिव संरिहाणे समानं योनिम् अनु सञ्चरन्ती (अगन्म)।

व्याख्या-हो नद्यौ 'मातृतमाम्' अतिशयेन मातरं 'सिन्धुं' स्रवन्तीं शुतुद्रीं त्वाम् 'अच्छ' आभिमुखेन 'अयासं' विश्वमित्रोऽहं प्राप्तोऽभूवम्। 'उर्वीं' महतीं 'सुभगां' सौभाग्यवतीं 'विपाशं' त्वाम् 'अगन्म' वयं प्राप्ताः स्मः। किं कुर्वत्यौ। 'मातरा' मातरौ द्वे धेनू वत्समिव 'संरिहाणे'। अन्तर्णीतसन्नर्थो लिहिः। जिह्वया लेढुमिच्छन्त्यौ यथा वत्समनुगच्छतस्तद्वत् 'समानम्' एकं 'योनिं' स्थानं समुद्रम् 'अनु' अभिलक्ष्य 'संचरन्ती' सम्यकं चरन्त्यौ। युवामयासिषमिति पूर्वेणान्वयः॥

सरलार्थः - श्रेष्ठायाः मातुः नद्याः (शुतुद्र्याः) समीपं, विस्तृतायाः तथा मनोहरायाः विपाट्-नद्याः समीपञ्च आगतः अस्मि। यथा एकमेव वत्सं मातरौ लिढः, तथा एकमेव स्थानं (समुद्रमुद्दिश्य) प्रवहन्त्यौ शुतुद्री-विपाशौ आगच्छतः।३

व्याकरणम् -

- मातृतमाम्-अतिशयेन मातरम्। अतिशयार्थे तमपि।
- अयासम्- या-धातोः लुङ्लकारे उत्तमपुरुषैकवचने।

टिप्पणी

- सुभगाम्- शोभनः भगः यस्याः ताम्।
- संरिहाणे- सम्पूर्वकात् लिह्-धातोः शानचि लस्य रादेशे नस्य च णकारे।
- अगन्म- गम्-धातोः लुङि उत्तमपुरुषद्विवचने।
- सञ्चरन्ती- सम्पूर्वकात् चर्-धातोः शतरि ङीपि प्रथमाद्विवचने। पदान्त ईकारः प्रगृह्यः।

पाठगतप्रश्नाः-१

१. पर्वतक्रोडात् के नद्यौ प्रवहतः।

२. काः इव नद्यौ प्रवहतः।

३. पिन्वमाने इत्यस्य व्युत्पत्तिं लिखत।

४. इन्देषिते इत्यस्य कः अर्थः।

५. विपाशानद्याः तीरं कः आगतः।

६. संरिहाणे इत्यस्य व्यत्पत्तिं लिखत।

एना वयं पयसा पिन्वमाना अनु योनिं देवकृतं चरन्तीः।
न वर्तवे प्रसवः सर्गतक्तः किंयुर्विप्रो नद्यो जोहवीति॥४॥

पदपाठः- **एना। वयम्। पयसा। पिन्वमानाः। अनु। योनिम्। देवऽकृतम्। चरन्तीः॥ न। वर्तवे। प्रऽसवः। सर्गऽतक्तः। किम्ऽयुः। विप्रः। नद्यः। जोहवीति॥४॥**

अन्वयः- एना वयं पयसा पिन्वमाना देवकृतं योनिम् अनु चरन्तीः। सर्गतक्तः प्रसवः न वर्तवे। किंयुः विप्रः नद्यो जोहवीति।

व्याख्या-एवं स्तुते नद्यौ विश्वामित्रं प्रत्यूचतुः। 'एना' एनेन 'पयसा' 'पिन्वमाना' संतपर्यन्त्यः 'देवकृतं' देवेनेन्द्रेण कृतं संदिष्टं 'योनिं' स्थानं समुद्रम् अनु लक्षीकृत्य 'चरन्तीः' गच्छन्त्यः वयम् आस्महे। द्वयोर्बहुवचनं पूजार्थम्। तासामस्माकं 'सर्गतक्तः' सर्गे गमने प्रवृत्तः प्रसवः उद्योगः 'न वर्तवे' निर्वतनाय न भवति। 'किंयुः' किमिच्छन् असौ 'विप्रः' ब्राह्मणः नद्यः नदीः अस्मान् 'जोहवीति' भृशमाह्वयति॥

सरलार्थः - (एवं स्तुतिं कुर्वन्तं विश्वामित्रं प्रति नद्यौ आहतुः यत्) एतादृश्यः वयं (नद्यः) स्वजलधाराभिः इन्द्रेण निर्मितं समुद्रं प्रति गच्छामः। स्वभावतः प्रवहन्तीनाम् अस्माकं गतिः अरोधनीया। कथम् ऋषिः नदीं वारं वारं स्तौति।४

व्याकरणम् -

- एना- इदम्शब्दस्य तृतीयैकवचने, विभक्ति इत्यस्य आदेशे।
- देवकृतम्- देवेन कृतम्।कृ-धातोः क्तप्रत्यये।
- वर्तवे- वृ-धातोः तवेन प्रत्यये। (वैदिकरूपम्)।
- प्रसवः - प्रपूर्वकात् षू-धातोः अप्प्रत्यये।
- सर्गतक्तः - सर्गे तक्तः। सृज्-धातोः घञ्प्रत्यये सर्ग। तक् +क्त।
- किंयुः- किम् इच्छन् इत्यर्थे क्यच्प्रत्यये। क्यछन्दसि इत्यनेन उप्रत्यये।
- जोहविति- पुनः पुनः ह्वयति। यङ्प्रत्यये सति द्वित्वे अभ्यासे जादेशे गुणे संप्रसारणे इडागमे गुणे अवादेशे च।

रमध्वं मे वचसे सोम्याय ऋतावरीरुप मुहूर्तमेवैः।

प्र सिन्धुमच्छा बृहती मनीषावस्युरह्वे कुशिकस्य सूनुः॥५॥

पदपाठः- रमध्वम्। मे। वचसे। सोम्याय। ऋतऽवरीः। उप। मुहूर्तम्। एवैः॥ प्र। सिन्धुम्।

अच्छ। बृहती। मनीषा। अवस्युः। अह्वे। कुशिकस्य। सूनुः॥५॥

अन्वयः- (हे) ऋतावरीः मे सोम्याम् वचसे मूहर्तम् एवैः उप रमध्वम्। कुशिकस्य सूनुः (अहम्) अवस्युः बृहती मनीषा सिन्धुम् अच्छा प्र अह्वे।

व्याख्या-विश्वामित्रो नदीः प्रति ब्रुते। 'ऋतावरीः'। ऋतमुदकम्। तद्वत्यो हे नद्यो यूयं 'मे' विश्वामित्रस्य मम 'सोम्याय' उत्तीर्याहं सोमं संपादयामीत्येवं सोमसंपादिने 'वचसे' तदर्थम् 'एवैः'। पञ्चम्यर्थे तृतीया। शीघ्रगमनेभ्यः 'मुहूर्तं' मुहूर्तमात्रम् उपरमध्वम्। उपपूर्वो रमिरुपसंहारे वर्तते। क्षणमात्रं शीघ्रगमनादुपरता भळत। सामन्येन नदीषूच्यमानासु समीहितं प्रयोजनमकुर्वतीषु पुरोवर्तिनी शुतुद्रीं प्रति ब्रुते। 'कुशिकस्य' राजर्षेः 'सुनुः' विश्वामित्रोऽहं 'बृहती' महत्या 'मनीषा' मनीषया स्तुत्या 'अवस्युः' आत्मनो रक्षणमिच्छन् सन् 'सिन्धुं' शुतुद्रीं त्वाम् 'अच्छ' आभिमुख्येन 'प्र अह्वे' प्रकर्षणाह्वयामि। अत्र निरुक्तम्- 'उपरमध्वं मे वचसे सोम्याय सोमसंपादिने। ऋतावरीर्ऋतवत्यः ऋतमित्युदकनाम प्रत्यृतं भवति मुहूर्तमेवैरयनैरवनैर्वा। प्राभिह्वयामि सिन्धुं बृहत्या महत्या मनीषया मनस ईषया स्तुत्या वाऽवनाय कुशिकस्य सूनुः। कुशिको राजा बभूव' (निरु. २/२५) इति॥

सरलार्थः -

(विश्वामित्रः नदीः प्रति कथयति) हे पूतसलिलवत्यः, मे हितवचनं प्रति आदरभावनया स्वगतिं क्षणाय रुन्द्ध। स्वस्मै हितेच्छुः (अहं) कुशिकपुत्रः (विश्वामित्रः) उच्चैः नदीं (शुतुद्रीम्) आहूतवान्।५

व्याकरणम् -

- ऋतावरीः -ऋतम् यस्याः सा इत्यर्थे मतुपि छन्दससीवनिपौ इत्यनेन वनिपि, वनो र च इत्यनेन ङीपि वनः नकारारस्य रादेशे वाछन्दसि इत्यनेन दीर्घे। ततः सम्बोधनबहुवचने।
- एवैः- इण्-धातोः इणशीङ्भ्यां वन् इत्यनेन वन्प्रत्यये गुणे ततः तृतीयाबहुवचने।
- मनीषा-मनसः ईषा मनीषा।
- अवस्युः-अवः आत्मन इच्छति इत्यर्थे सुप आलन क्यच् इत्यनेन क्यचि ततः क्याच्छन्दसि इत्यनेन उप्रत्यये अवस्युः।

इन्द्रो अस्माँ अरदद्वज्रबाहुरपाहन्वृत्रं परिधिं नदीनाम्।

देवोऽनयत्सविता सुपाणिस्तस्य वयं प्रसवे याम उर्वीः॥६॥

पदपाठः- इन्द्रः। अस्मान्। अरदत्। वज्रऽबाहुः। अप। अहन्। वृत्रम्। परिऽधिम्। नदीनाम्॥

देवः। अनयत्। सविता। सुऽपाणिः। तस्य। वयम्। प्रऽसवे। यामः। उर्वीः॥६॥

अन्वयः- वज्रबाहुः इन्द्रः अस्मान् अरदत्, नदीनां परिधिं वृत्तम् अप अहन्। सुपाणिः सविता देवः (अस्मान्) अनयत्। वयं उर्वीः तस्य प्रसवे यामः।

व्याख्या-नद्यः प्रत्यूचुः। ह विश्वमित्र, 'वज्रबाहुः' वज्रयुक्तो बाहुर्ययस्यासौ वज्रबाहुः। तादृशो बलवान् 'इन्द्रः' नदीः 'अस्मान्' 'अरदत्'। रदति खनतिकर्मा। अखनत्। कथमखनत्। उच्यते। 'नदीनां' शब्दकारिणीनामपां 'परिधिं' परितो निहिमुदकमन्तः कृत्वा परितो वर्तमानमित्यर्थः। तादृशं 'वृत्रम्'। वृणोत्याकाशमिति वृत्रो मेघः। तं मेघम् 'अपाहन्' जघान। तस्मिन् हते आपः पतिताः। ताभिर्गच्छन्तीभिर्वयं खाताः। एवं मेघहननद्वारेणाखनत्। न केवलमखनत्। किं तर्हि। 'सविता' सर्वस्य जगतः प्रेरकः 'सुपाणिः' शोभनहस्तः उत्पत्तिस्थितिकर्तृत्वात्तादृशः 'देव' द्योतमानः इन्द्रः अस्मान् अनयत्। मेघभेदनं कृत्वोदकप्रेरणेन समुद्रमपूरयत्। 'तस्य' तादृशसामर्थ्योपेतस्य इन्द्रस्य प्रसवे अभ्यनुज्ञायां वर्तमाना 'उर्वीः' उदकैः प्रभूताः 'वयं' 'यामः' गच्छामः। न तव वचनादुपरमामहे। उक्तार्थं यास्को ब्रवीति- 'इन्द्रो अस्मानरदद्वज्रबाहू। रदति खनतिकर्म। अपाहन्वृत्रं परिधिं नदीनामिति व्याख्यातम्। देवोऽनयत्सविता सुपाणिः कल्याणपाणिः। पाणिः पणायतेः पूजाकर्मणः प्रगृह्य पाणी देवान् पूजयन्ति। तस्य वयं प्रसवे याम उर्वीरुर्व्यः' (निरु. २/२६) इति।

सरलार्थः -

पाणिभ्यां वज्रं धारयन् इन्द्रः अस्मान् (नदीः) बहिः आनीतवान्। सः (इन्द्रः) नदीनां गतिबाधकं वृत्रं (मेघम्) हतवान्। शोभनहस्तवान् इन्द्रः अस्मान् (नदीः) आनीतवान्। वयं (नद्यः) तस्यैव (इन्द्रस्य) आज्ञया वहामः।६

व्याकरणम् -

- अरदत्- रद्-धातोः लङि प्रथमपुरुषैकवचने।
- अनयत्-नी-धातोः लङि प्रथमपुरुषैकवचने।
- यामः-या-धातोः लटि प्रथमपुरुषैकवचने।

पाठगतप्रश्नाः-२

७. नद्यौ कुत्र गच्छतः।

८. ऋषिः नदीं कथं स्तौति।

९. भरताः इत्यस्य कः अर्थः।

१०. शीभम् इत्यस्य कः अर्थः।

११. वज्रबाहुः कः।

१२. वृत्रः कः।

प्रवाच्यं शश्वधा वीर्यं१ तदिन्द्रस्य कर्म यदहिं विवृश्चत्।

वि वज्रेण परिषदो जघानायन्नापोऽयनमिच्छमानाः॥७॥

पदपाठः- प्रऽवाच्यम्। शश्वधा। वीर्यम्। तत्। इन्द्रस्य। कर्म। यत्। अहिम्। विऽवृश्चत्॥ वि। वज्रेण। परिऽसदः। जघान। आयन्। आपः। अयनम्। इच्छमानाः॥

अन्वयः- इन्द्रस्य तत् वीर्यं कर्म यदहिं विवश्चत् शश्वधा प्रवाच्यम्। वज्रेण परिषदः वि जघानः (तदनन्तरम्) आपः अयनम् इच्छमानाः आयन्।

व्याख्या- योऽयमिन्द्रः 'अहिं' मेघं 'विवृश्चत्' उदकप्रेरणार्थं जघानेति 'यत्' 'कर्म' छेदनरूपं 'तत्' इदं तस्य 'इन्द्रस्य' 'वीर्यं सामर्थ्यं' 'शश्वधा' सर्वदा 'प्रवाच्यं' प्रकर्षेण वचनीयम्। तथा स इन्द्रः 'परिषदः' परितः सीदत आसीनान् प्रतिबन्ध-कारिणोऽसुरान् 'वज्रेण' 'वि' 'जघान'। अथ 'अयनं' स्थानम् 'इच्छमानाः' इच्छन्त्यः 'आपः' 'आयन्' यान्ति॥

सरलार्थः -

इन्द्रस्य तत् पराक्रमशालि कार्यं यत् सः अहिं (वृत्रम्) हतवान्, तत् (प्रशंसनीयम्) एव। सः वज्रेण (जलस्य प्रतिबन्धकं) मेघं कर्तितवान्। आपः स्वमार्गम् अन्विषन्ति प्रवहन्ति। ७

व्याकरणम् -

- प्रवाच्यम्- प्रपूर्वकात् वच्-धातोः ण्यत्प्रत्यये।
- वीर्यम् - वीर्-धातोः यत्प्रत्यये।
- विवृश्चत् - व्रश्च्-धातोः लङि प्रथमपुरुषैकवचने।
- परिषदः -परिपूर्वकात् सद्-धातोः क्विपि।
- जघान- हन्-धातोः लिटि प्रथमपुरुषैकवचने।
- आयन्-इ-धातोः लङि प्रथमपुरुषबहुवचने।
- इच्छमानाः -इष्-धातोः शनचि प्रथमाबहुवचने।

एतद्वचो जरितर्मापि मृष्ठा आ यत्ते घोषानुत्तरा युगानि।

उक्थेषु कारो प्रति नो जुषस्व मा नो नि कः पुरुषत्रा नमस्ते॥८॥

पदपाठः- एतत्। वचः। जरितः। मा। अपि। मृष्ठाः। आ। यत्। ते घोषान्। उत्ऽतरा। युगानि॥

उक्थेषु। कारो इति। प्रति। नः जुषस्व। मा। नः। नि। करिति कः। पुरुषऽत्रा। नमः।

ते॥८॥

अन्वयः- (हे) जरितः एतद् वचः मा अपि मृष्ठाः यत्ते आ घोषान् उत्तरा युगानि। हे कारो उक्थेषु नः प्रति जुषस्व। मा नः पुरुणत्रा नि कः, ते नमः।

व्याख्या-नद्यः प्रसङ्गाद् इन्द्रस्तोत्रं श्रुत्वा विश्वामित्रं प्रत्यूचुः। 'जरितः' स्तोतर्हे विश्वामित्र 'ते' त्वदीयं यत् संवादात्मकं 'वचः' त्वं 'नः' अभीत्य 'आ घोषान्' उद्घोषयन् वर्तसे तद्वचः 'मापि मृष्ठाः' मा विस्मार्षीः। किं कारणम्। 'उत्तरा युगानि' उत्तरेषु याज्ञिकेषु युगेषु अहःसु 'उक्थेषु' 'कारो' शस्त्राणां कर्तस्त्वं 'नः' अस्मान् 'प्रति जुषस्व' संवादात्मकेन तेन वाक्येन प्रतिसेवस्व। इदानीं 'नः' अस्मान् पुरुषत्रा पुरुषेषु 'मा नि कः' उक्तिप्रत्युक्तिरूपसंवादवाक्याध्यापनेन नितारां पुंवत् प्रागल्भाः ना कार्षीः। 'ते' तुभ्यं 'नमः'॥

सरलार्थः -

हे स्तुतिगायक, एतद्वचः न कदापि विस्मरतु येन भाविनो युगस्य मानवाः ते इदं वचनं श्रोतुं शक्नुयुः। हे कवे, स्तुत्या माम् आदरतु। (उक्ति-प्रत्युक्तिभिः) मनुष्यकोटेः अधः अस्मान्(नदीः) मा नयतु। ८

व्याकरणम् -

- जरितः-जृ-धातोः तृचि ततः सम्बोधने।
- मृष्ठाः-मृष्-धातोः लुङि मध्यमपुरुषैकवचने।
- घोषान्- घुष्श्रवणे इतिधातोः लटि प्रथमपुरुषबहुवचने।

- कारो- कृ-धातोः उणि सम्बोधने।
- जुषस्व- आत्मनेपदिनःजुष्-धातोः लोटि मध्यमपुरुषैकवचने।
- कः -कृ-धातोः लुङि मध्यमपुरुषैकवचने वैदिकरुम्।
- पुरुषत्रा- सप्तम्यर्थ देवमनुष्यपुरुमतर्येभ्यो द्वितीयसप्तम्योर्बहुलम् त्रा प्रत्यये।

ओ षु स्व॑सारः का॒रवे॑ शृणोत य॒यौ वो दू॒रादन॑सा रथे॑न।

नि षू न॑मध्वं॒ भव॑ता सु॒पा॒रा अ॑धोअ॒क्षाः सि॑न्धवः स्रो॒त्याभिः॑॥९॥

पदपाठः- ओ इति॑। सु। स्व॒सा॒रः॒। का॒रवे॑। शृ॒णो॒त॒। य॒यौ। व॒ः। दू॒रात्। अन॑सा। रथे॑न॥ नि। सु। न॒म॒ध्व॒म्। भव॑त। सु॒ऽपा॒राः। अ॒धः॒ऽअ॒क्षाः। सि॒न्ध॒वः॒। स्रो॒त्याभिः॑॥९॥

अन्वयः- ओ स्वसारः कारवे सु शृणोत, दूरात् अनसा रथेन वः ययौ। हे सिन्धवः स्रोत्याभिः निनमध्वम्, अधोअक्षाः सुपाराः भवतः।

व्याख्या- विश्वामित्रो नदीः प्रत्युवाच। स्वसारः भगिन्यः सिन्धव हे नद्यः कारवे स्तोत्रं कुर्वाणस्य मम वचनं सु सुष्ठु ओ शृणोत शृणुतैव। अनसा शकटेन रथेन च सह दूरात् विप्रकृष्टाद्देशात् वः युष्मान् ययौ प्राप्तोऽस्मि। यूयं सु सुष्ठु नि नमध्वम् आत्मना स्वयं प्रह्वाः भवत। किंच स्रोत्याभिः स्रवणशीलाभिरद्भिः अधोअक्षाः रथाङ्गस्याक्षास्याधस्ताद् भवत। यदापोऽक्षस्याधस्ताद्भवन्ति तदा रथादीनि नेतुं शक्यते। तस्मुत् तत्परिमाणोदकाः भवेति अर्थाभिप्रायः॥

सरलार्थः - (तदनन्तरं विश्वामित्रः नदीं प्रत्युवाच) भोः स्वसारः, (मम) कवेः वाक् सम्यक्तया शृण्वन्तु (यतो हि) सः त्वत्समक्षं बहोः दूरात् रथेन समागतः अस्ति। स्वजलधारां हे प्रवहमानाः नद्यः रथस्य अक्षस्य अधो नयन्तु, येन रथः तरणयोग्यो भवेत्।९

व्याकरणम्-

- ओ- सम्बोधनवाचकनिपातः।
- शृणोत- श्रु-धातोः लोटि मध्यमपुरुषबहुवचने।
- ययौ- या-धातोः लिट् उत्तमपुरुषैकवचने।
- नमध्वम्- नम्-धातोः लोटि मध्यमपुरुषैकवचने।
- भवत- भू-धातोः लोटि मध्यमपुरुषैकवचने।

पाठगतप्रश्नाः -३

१३. इन्द्रः केन वृत्रं हतवान्।

१४. शश्वधा इत्यस्य कः अर्थः।

१५. नद्योः का प्रार्थना।

१६. मापि मृष्ठाः इत्यस्य कः अर्थः।

१७. विश्वामित्रः केन आगतः।

१८. नदीं प्रति विश्वामित्रस्य का प्रार्थना।

१५.१.२) मूलपाठम् अवगच्छाम -

आ ते कारा शृणवामा वचांसि ययाथ दूरादनसा रथेन।

नि ते नंसै पीप्यानेव योषा मर्यायेव कन्या शश्वचै ते॥१०॥

पदपाठः- आ। ते। कारो इति। शृणवाम। वचांसी। ययाथ। दूरात्। अनसा। रथेन॥ नि। ते।

नंसै। पीप्यमाऽइव। योषा। मर्यायऽइव। कन्या। शश्वचै। त इति ते॥१०॥

अन्वयः- (हे कारो) ते वचांसि शृणवाम (यत् त्वं) दूराद् अनसा रथेन ययाथ। पीप्याना इव योषा ते नंसै, मर्याय इव कन्या ते शश्वचैः।

व्याख्या- नद्यः पूर्वं विश्वमित्रं प्रत्याख्यायानयर्चा तस्य वाक्यमाशुश्रुवुः। 'कारो' स्तोत्रं कुर्वाण हे विश्वामित्र 'ते' तव 'वचांसि' इमानि वाक्यानि 'आ शृणवाम' शृणुमः। तव समीहितं प्रयोजनं कुर्म इत्यर्थः। 'अनसा' शकटेन 'रथेन' च सह 'ययाथ'। यतो 'दूरात्' आगतोऽसि। वयं च 'ते' त्वदर्थं 'नि नंसौ' नीचैर्नमाम। प्रत्येकविवक्षया अत्रेवचनम्। रथेन गन्तुं गाधोदका भवामेत्यर्थः। तर् दृष्टान्तः। 'पीप्यनेव योषा'। पीप्याना पुत्रं स्तनं पाययन्ती योय़षा माता यथा प्रह्वीभवति। दृष्टान्तान्तरम्। यथा 'कन्या' युवतिः 'मर्यायेव' मनुष्याय पित्रे भ्रात्रे वा 'शश्वचैः' परिष्वजनाय नम्रीभवति तद्वत् ते त्वदर्थं प्रह्वीभवामः। 'ते' इति पुनरुक्तिरादरार्थम्। एतामृचं यास्क एवं व्याचष्टे- 'आशृणवाम ते कारो वचनानि याहि दूरादनसा च रथेन च निनमाम ते पाययमानेव योषा पुत्रं मर्यायेव कन्या परिष्वजनाय निनमा इति वा' (निरु. २.२३) इति॥

सरलार्थः -

हे कवे, वयं ते अनुज्ञां शृणुमः, (यतो हि) त्वं दूराद् रथेन आगतः असि। यथा स्तनवती माता (स्वपुत्रार्थं) किञ्च यथा कापि बाला स्वपितरं भातरं वा आलिङ्गति (तथैव) त्वदर्थम् अहं मम नीचैः गच्छामि (जलस्तरं स्वल्पं विदधामि इत्यर्थः)।

व्याकरणम् -

- शृणवाम-श्रृ-धातोः लटि उत्तमपुरुषबहुवचने वैदिकरूपम्।

- ययाथ- या-धातोः लिटि मध्यमपुरुषबहुवचने।
- नंसौ- नम्-धातोः लुङि उत्तमपुरुषबहुवचने।
- शश्वचैः - श्वच्-धातोः क्वपि।

यदङ्ग त्वा भरता संतरेयुर्गव्यन्ग्राम इषित इन्द्रजूतः।

अर्षादह प्रसवः सर्गतक्त आ वो वृणे सुमतिं यज्ञियानाम्॥११॥

पदपाठः- यत्। अङ्ग। त्वा। भरताः। सम्ऽतरेयुः। गव्यन्। ग्रामः। इषितः। इन्द्रजूतः॥ अर्षात्। अह। प्रऽसवः। सर्गतक्तः। आ। वः। वृणे। सुऽमतिम्। यज्ञियानाम्॥११॥

अन्वयः- अङ्ग यद् गव्यन् इन्द्रजूतः इषितः भरताः ग्रामः त्वा संतरेयुः सर्गतक्तः प्रसवः अर्षाद् अह। यज्ञियानाम् व सुमतिम् आ वृणे।

व्याख्या- विश्वामित्रो नदीं प्रत्युवाच। अङ्ग इत्यामन्त्रणा। हे नद्यः यत् यस्मात् युष्माभिरुत्तितीर्षोः ममोत्त्रणमभ्यनुज्ञातं तस्मात् भराताः भरतकुलजाः मदीया सर्वे परस्परमेकतामापन्ना नदीं ता संतरेयुः सम्यगुत्तीर्णा भवेयुः। तदेव विशिनष्टि। गव्यन् गा उदकानि तरीतुमिच्छन् इषितः त्वयाभ्यनुज्ञातः इन्द्रजूतः युष्माकं प्रवर्तकेनेन्द्रेण च प्रेरितः ग्रामः भरतानां संघः अर्षात् संतरेत्। यत् सर्गतक्तः गमनाय प्रवृत्त प्रसवः तेषामुद्योगः अह पूर्वं युष्माभिरनुज्ञातः। अहं तु यज्ञियानां यज्ञार्हाणां वः युष्माकं सुमतिं शोभनां स्तुतिम् आ वृणे सर्वतः संभजे॥

सरलार्थः - भोः (नद्यः), (युष्माकमनुमतिः प्राप्ता, अतः) भरतवंशीयाः (वयं) युष्मान् (नदीः) उत्तारयिष्यामः। (त्वया) अनुज्ञाप्राप्तानां तथा इन्द्रेण प्रेषितानां समूहं उत्तारयिष्यामः। युष्माकं गतिः स्वाभाविकरूपेण प्रवहतु। पूतसलिलानां समर्थनम् इच्छामि अहम्।११

व्याकरणम् -

- सन्तरेयुः-सम्पूर्वकात् तृ-धातोः विधिलिङि प्रथमपुरुषबहुवचने।
- इन्द्रजूतः-इन्द्रेण जूतः।
- गव्यन्- गोः क्यचि।
- अर्षात्- ऋष्-धातोः लेटि प्रथमपुरुषैकवचने।
- वृणे- वृ-धातोः लटि उत्तमपुरुषैकवचने।

अतारिषुर्भरता गव्यवः समभक्त विप्रः सुमतिं नदीनाम्।

प्र पिन्वमाध्वमिषयन्तीः सुराधा आ वक्षणाः पृणध्वं यात शीभम्॥१२॥

पदपाठः- अतारिषुः। भरताः। गव्यवः। सम्। अभक्त। विप्रः। सुऽमतिम्। नदीनाम्॥ प्र।

पिन्वध्वम्। इषयन्ती। सुऽराधाः। आ वक्षणाः। यात। शीभम्॥१२॥

अन्वयः- गव्यवः भरताः अतारिषुः। विप्रः नदीनाम् सुमतिम् सम् अभक्त। सुराधाः (यूयं) इषयन्तीः प्र पिन्वध्वम्, वक्षणाः आ पृणध्वम्, शीभं यात।

व्याख्या- 'गव्यवः' गा आत्मन इच्छतः 'भरताः' भरतकुलजाः सर्वे 'अतारिषुः' तां नदीं समतरन्। 'विप्रः' मेधावी विश्वामित्रः 'नदीनां सुमतिं' शोभनां स्तुतिं 'समभक्त' समभजत। यूयं तु यथापूर्वम् 'इषयन्तीः' कुल्यादिद्वारा अन्नं कुर्वाणा अत एव 'सुराधाः' शोभनधनोपेता यूयं 'वक्षणाः' कृत्रिमसरितः कुल्याः 'प्र पिन्वध्वं' प्रकर्षेण तर्पयत। 'आ पृणध्वं' ताः सर्वतः पूरयत च। 'शीभं' शीघ्रं 'यात' गच्छत च॥

सरलार्थः - पारं गन्तुम् इच्छवः भरतवंशीयाः पारं जग्मुः। ब्राह्मणः नदीनां समर्थनं सम्यक्तया प्राप्तवान्। शोभनधनवत्यो (यूयं) धनम् उत्पादयन्तः स्वस्थाने एव सम्यक् प्रवहन्तु, प्लाविता भवन्तु, वेगेन प्रवहन्तु।१२

व्याकरणम् -

- आतारिषुः-तृ-धातोः लुङि प्रथमपुरुषबहुवचने।
- भक्त-भज्-धातोः लुङि प्रथमपुरुषैकवचने।
- इषयन्तीः- इष्-धातोः णिचि।
- पिन्वध्वम्- पिन्व-धातोः लोटि मध्यमपुरुषबहुवचने।
- पृणध्वम् -पृञ्-धातोः लोटि मध्यमपुरुषबहुवचने।
- यात- या-धातोः लोटि मध्यमपुरुषबहुवचने।

उद्व ऊर्मिः शम्या हन्त्वापो योक्त्राणि मुञ्चत।

मादुष्कृतौ व्येनसाघ्न्यौ शूनमारताम्॥१३॥

पदपाठः- उत्। वः। ऊर्मिः। शम्याः। हन्तु। आपः। योक्त्राणि। मुञ्चत। मा। अदुःऽकृतौ।

विऽएनसा। अघ्न्यौ। शूनम्। आ। अरताम्॥१३॥

अन्वयः- आपः ऊर्मिः वः शम्या उद् हन्तु, आपः योक्त्राणि मुञ्चत। अदुष्कृतौ व्येनसौ अघ्न्यौ शूनताम् मा अरताम्।

व्याख्या-पूर्वमुत्तितीर्षुर्विश्वामित्रो नदीरुक्त्वा अधुना उत्तितीर्षुः पुनराह। हे नद्यः 'वः' युष्माकम् 'ऊर्मिः' तरङ्गः 'शम्याः' युग्यकण्ठपार्श्वादिसंलग्ना रज्जवः 'उत्' ऊर्ध्वं यथा भवन्ति तथा 'हन्तु' गच्छतु। स तरङ्गो रज्जूनामधो गच्छत्विभिप्रायः। तथा हे 'आपः' यूयं 'योक्त्राणि' ता रज्जूः मुञ्चत।

यथा न स्पृशन्ति तथा यान्त्वित्यभिप्रायः। 'व्येनसा' विगतपापे अत एव अदुष्कृतौ वल्याणकर्मकारिण्यौ 'अघ्न्यौ' अघ्न्ये न केनापि तिरस्करणीये विपाट्छुतुद्र्यौ 'शूनं' समृद्धिं मा आरताम् आगच्छताम्। एवं विश्वामित्रो नदीः स्तुत्वा ताभिरनुज्ञातोऽतरदिति॥

सरलार्थः -

भोः नद्यः प्रग्रहान् त्यजध्वम्। दुष्कृतिरहिताः पापरहिताः तिरस्कारायोग्याः एता नद्यः वृद्धिं न प्राप्नुवन्तु।१३

व्याकरणम् -

- हन्तु- हन्धतोः लोटि प्रथमपुरुषैकवचने।
- मुञ्चत- मुञ्च्-धातोः लोटि प्रथमपुरुषबहुवचने।
- अरताम्- ऋ-धातोः लुङि प्रथमपुरुषद्विवचने।

पाठगतप्रश्नाः - ४

१९. प्र पिन्वध्वमित्यस्य कः अर्थः।
२०. समभक्त इत्यस्य कः अर्थः।
२१. उर्मिः इत्यस्य कः अर्थः।
२२. शून इत्यस्य कः अर्थः।
२३. विश्वामित्रः कस्य राज्ञः पुरोहितः।
२४. विश्वमित्रः कस्य पुत्रः।
२५. विश्वामित्रः पौरहित्येन किम् आनीतम्।
२६. विश्वामित्रः केन नदीतटम् आगतवान्।
२७. विश्वामित्रः कयोः नदीतीरं प्राप्तवन्।
२८. विश्वामित्रः नद्याः समीपे किं प्रार्थितवान्।
२९. नद्यौ केन सृष्टे।
३०. वृत्रासुरं कः हतवान्।

१५.२) विश्वामित्र-नदीसंवादः (संक्षेपेण)

ऋग्वेदे नैके रसपूर्णसंवादासूक्ताः सन्ति। वैदिककथासहित्ये विश्वामित्र-नदीकथा एका अन्यतमा कथा। एवम् ऋग्वेदे अनेके सूक्ते कथोपकथनं प्राधान्येन दृश्यते। कथोपकथनमेव संबादनाम्ना प्रसिद्धः।

संबादविषये पाश्चात्यपण्डितानां मतपार्थक्यं दृश्यते। डः ओल्डेन वर्गमतानुसारेण संवादाः प्राचीनोपाख्यानाम् अवशिष्टस्वरुम्। तस्य मतानुसारेण ऋग्वेदीयोपाख्यानानि गद्यात्मकानि। डः ग्रोदरादि पण्डितानां मतानुसारेण संवादाः वैदिकनाटकस्वरूपम्। डः विन्टरनित्स अस्य मतानुसारेण लोकगीतस्य काव्यस्य स्वरूपमिदम्। काले काले काव्यस्य उत्पत्तिः नवीननाटकानम् उत्पत्तिः च अभवत्। एवमेव भारतीसाहित्येतिहासे संवादानां महत्त्वपूर्णं स्थानं वर्तते।

एतेषु सेवादेसु विश्वामित्र-नदीसंवादः अन्यतममहत्वपूर्णसंवादः। प्राचीनकाले विश्वामित्रः राज्ञः सुदासस्य पुरोहितः आसीत्। विश्वामित्रः पौरहित्येन प्राप्तं धनं नीत्वा शकेटेन विपाशानद्याः किञ्च शुतुद्रीनद्याः तीरं प्राप्तवान्।अतः परं नदीपारं गमनाय यथा नद्याः जलस्तरं नीचैः भवति तदर्थं महर्षिविश्वामित्रः नद्योः स्तुतिं कुर्वन् कथयति - प्रग्रहात् मुक्तौ अश्वौ यथा धावतः तथा सागरसंगमनाय पर्वताङ्कात् गत्या प्रवाहत्योः श्रेष्ठनदीमात्रोः शुतुद्रीविपाशायोः तीरमागतवान्। तथा विस्तिर्णसौन्दरे नद्योः तटं प्राप्तवान्।द्वौ गावौ यथा एकमेव वत्स्यं लिढः तथा नद्यौ अपि सागरसंगमनाय एकमेवलक्षे प्रवहत्यौ एवं नद्योः तीरम् आगतवान्। एवं विश्वामित्रः नद्यौ स्तुवन् अस्ति। तदा विश्वामित्रमुद्दिश्य नद्यौ कथयतः-

नदी-

आवाम् इन्द्रदेवन सृष्टे स्वगत्या प्रवहाव। अवयोः गतिः न रोधनीया इति। अस्यार्थः यदा वृत्रासुरः पृथ्वीनाशाय नदीनां प्रवाहधारां रुद्धवान्। तदा इन्द्रदेवः वृत्रासुरं हत्वा पर्वताङ्कात् अस्याः नद्याः सृष्टिं कृतवान्। तर्हि किमर्थम् ऋषिः वारं वारं नदीं स्तौति। ऋषिपुत्रः कुशिकः स्वस्य रक्षणाय सोमयुक्तवचसा नदीं क्षणाय रोद्धुं स्तौति। वज्रहस्तः इन्द्रः नदीयाम् अवरोधकं वृत्तासुरं घातयित्वा निरविच्छिन्नतया प्रवहणाय मां बहिरानयत्। इन्द्रः अहिं हतवान् इति इन्द्रस्य पराक्रमयुक्तं कार्यम् अवश्यं कथनयोग्यम्। इदमेव विश्वामित्रः नदीं प्रति कथयति। नद्यः प्रत्युत्तरन्ति- हे स्तावकः इदं स्तुतिवचनं कदापि मा विस्मरतु यतो हि भाविपुरुषाः भवतः इदं स्तुतिवचनं श्रोतुं शक्नुयुः। हे ऋषे स्तुत्या माम् आदरतु अपि च मां स्तुत्या अलौकिकशोभां प्रददातु। अहं तुभ्यं प्रणमामि। ततः विश्वामित्रः नदीः भगिनीरूपेण सम्बोध्य कथयति- हो सुन्दर्यः भगिन्यः कवेः मम वचनं शृण्वन्तु, यतो हि बहुदूरं यानेन रथेन वा अतिक्रम्य अहं युष्मत्सकाशम् आगतवान् अस्मि। हे नद्यः किञ्चित् नीचैः गच्छतु। स्वस्य जलधाराम् अन्तः सङ्कोच्य तरणयोग्या भूत्वा प्रवहन्तु- विश्वामित्रः वचनं श्रुत्वा नद्यः तथा अभवन्। तदा विश्वामित्रः नदीभ्यः साधुवादं प्रददन् सपरिजनः नदीम् उत्तीर्णवान् ततः उत्तरणानन्तरं पुनः पूर्ववत्प्रवहणाय नदीं प्रार्थितवान् इति।

एवमिदं संवादसूक्तं नाटकीयौजस्वितया सम्पूर्णं परिपूर्णं तथा कलनात्मकदृष्ट्या सुन्दरं सरसं च अस्ति।

पाठसारः

प्राचीनकाले विश्वामित्रः राज्ञः सुदासस्य पुरोहितः आसीत्। विश्वामित्रः पौरहित्येन प्राप्तं धनं नीत्वा शकेटेन विपाशानद्याः किञ्च शुतुद्रीनद्याः तीरं प्राप्तवान्।अतः परं नदीपारं गमनाय यथा नद्याः जलस्तरं नीचैः भवति तदर्थं महर्षिविश्वामित्रः नद्योः स्तुतिं कुर्वन् कथयति - प्रग्रहात् मुक्तौ अश्वौ यथा धावतः तथा सागरसंगमनाय पर्वताङ्कात् गत्या प्रवाहत्योः श्रेष्ठनदीमात्रोः शुतुद्रीविपाशायोः तीरमागतवान्। तथा विस्तिर्णसौन्दरे नद्योः तटं प्राप्तवान्। द्वौ गावौ यथा एकमेव वत्स्यं लिढः तथा नद्यौ अपि सागरसंगमनाय एकमेवलक्षे प्रवहत्यौ एवं नद्योः तीरम् आगतवान्। एवं विश्वामित्रः नद्यौ स्तुवन् अस्ति।तदा विश्वामित्रमुद्दिश्य नद्यौ कथयतः-यदा वृत्रासुरः पृथ्वीनाशाय नदीनां प्रवाहधारां रुद्धवान्। तदा इन्द्रदेवः वृत्रासुरं हत्वा पर्वताङ्कात् अस्याः नद्याः सृष्टिं कृतवान्। ऋषिपुत्रः कुशिकः स्वस्य रक्षणाय सोमयुक्तवचसा नदीं क्षणाय रोद्धुं स्तौति। वज्रहस्तः इन्द्रः नद्याम् अवरोधकं वृत्तासुरं घातयित्वा निरविच्छिन्नतया प्रवहणाय मां बहिरानयत्। इन्द्रः अहिं हतवान् इति इन्द्रस्य पराक्रमयुक्तं कार्यम् अवश्यं कथनयोग्यम्। इदमेव विश्वामित्रः नदीं प्रति कथयति। नद्यः प्रत्युत्तरन्ति- हे स्तावकः इदं स्तुतिवचनं कदापि मा विस्मरतु यतो हि भाविपुरुषाः भवतः इदं स्तुतिवचनं श्रोतुं शक्नुयुः। हे ऋषे स्तुत्या माम् आदरतु अपि च मां स्तुत्या अलौकिकशोभां प्रददातु। अहं तुभ्यं प्रणमामि। ततः विश्वामित्रः नदीः भगिनीरूपेण सम्बोध्य कथयति- हो सुन्दर्यः भगिन्यः कवेः मम वचनं शृण्वन्तु, यतो हि बहुदूरं यानेन रथेन वा अतिक्रम्य अहं युष्मत्सकाशम् आगतवान् अस्मि। हे नद्यः किञ्चित् नीचैः गच्छतु। स्वस्य जलधाराम् अन्तः सङ्कोच्य तरणयोग्या भूत्वा प्रवहन्तु- विश्वामित्रः वचनं श्रुत्वा नद्यः तथा अभवन्। तदा विश्वामित्रः नदीभ्यः साधुवादं प्रददन् सपरिजनः नदीम् उत्तीर्णवान् ततः उत्तरणानन्तरं पुनः पूर्ववत्प्रवहणाय नदीं प्रार्थितवान् इति।

पाठान्तप्रश्नाः

१. स्वभाषया विश्वामित्र- नदीकथां लिखत।

२. विश्वामित्र-नदीसंवादस्य सारं संक्षेपेण लिखत।

३. प्र पर्वतानामुशती ....इत्यादिमन्त्रं व्याख्यात।

४. इन्द्रषिते प्रसवं भिक्षमाणे....इत्यादिमन्त्रं व्याख्यात।

५. अच्छा सिन्धुं मातृतमामयासं....इत्यादिमन्त्रं व्याख्यात।

६. एना वयं पयसा....इत्यादिमन्त्रं व्याख्यात।

७. रमध्वं मे वचसे....इत्यादिमन्त्रं व्याख्यात।

८. इन्द्रो अस्माँ ....इत्यादिमन्त्रं व्याख्यात।

९. प्रवाच्यं शश्वधा वीर्यं....इत्यादिमन्त्रं व्याख्यात।

१०. ओ षु स्वसारः ....इत्यादिमन्त्रं व्याख्यात।

११. यदङ्ग त्वा भरताः....इत्यादिमन्त्रं व्याख्यात।

१२. अतारिषुर्भरता....इत्यादिमन्त्रं व्याख्यात।

१३. उद्वः ऊर्मिः शम्या....इत्यादिमन्त्रं व्याख्यात।

पाठगतप्रश्नानाम् उत्तराणि

उत्तरकूटः-१

१. विपाशा।

२. शुतुद्रु।

३. पिविधातोः शानचि नमागमे मुकागमे

४. इन्द्रेण प्रेषिते।

५. विश्वामित्रः।

६. सम्पूर्वकात् लिह्-धातोः शानचि लस्य रादेशे नस्य च णकारे

उत्तरकूटः-२

७. समुद्रं प्रति।

८. पारं गमनाय।

९. भरतकुलजाः।

१०. शीघ्रम्।

११. इन्द्रः।

१२. मेघः।

उत्तरकूटः-३

१३. वज्रेण।

१४. सर्वदा।

१५. स्तुतिः इयम् मा विष्मार्षीः येन भाविनि काले जनाः अपि स्मरिष्यन्ति।

१६. मा विस्मार्षीः।

१७. रथेन।

१८. यथा नदी पारंगमनाय अधोगामी भवति।

उत्तरकूटः-४

१९. प्रकर्षेण तर्पयत।

२०. समभजत।

२१. तरङ्गः।

२२. समृद्धिः।

२३. सुदासस्य।

२४. कुशिकस्य।

२५. धनम्।

२६. रथेन।

२७. शुतुद्रुविपाशयोः।

२८. यथा नद्याः प्रवाहः स्तब्धी भवतु .।

२९. इन्द्रेण।

३०. इन्द्रः।

॥इति पञ्चदशः पाठः ॥